**शाकुन्तलेय** पु० शकुन्तलाया अपत्यं ढक्। दुष्मन्तात्मजे शकुन्तलागर्भजे भरते नृपे जटा० ।

**शाक्त** त्रि० शक्तिर्देवताऽस्य अण्। तन्त्रोक्ते शक्तिदेवतोपासके तस्य प्रशंसा मुण्डमालात० २पटले उक्ता "स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः। सौराणां गाण-पत्यानां वैष्णवानां तथैव च। शैवानां चैव शाक्तश्च क्रमशः क्रमशः प्रिये!" "शाक्ता एव द्विजाः सर्वे न शैवा न च वैष्णवाः। उपासते यतो देवीं गायत्रीं पर-मात्तराम्" निर्वाणत० २पटले। "शक्त्याराधनं कृत्वा नान्यस्याराधनं चरेत्। अन्यस्य स्मरणाद्देवि! योगिनी शापमालभेत्" गन्धर्वत०। "तर्जन्या रजतं धार्यं स्वर्णं धार्य्यमनामया। एष एव क्रमः शाक्तो न दर्भो वन-चर्मणः" श्यामार०। [अमरः।

**शाक्तीक** पु० शक्तिः प्रहरणमस्य ईकक्। शक्त्या योद्धरि

**शाक्य** पु० शक-घञ् तत्र साधुः यत्। बुद्धे।

शाक्यशब्दनिरुक्तिरन्यथोक्ता यथा

"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे। तस्मादि-क्ष्वाकुवंश्यास्ते भुवि शाक्या इति स्मृताः" भरतधृतवच-नम्। इयमन्याख्यायिका पितृशप्ताः केचिदिक्ष्वाकुवंश्या गौतमवंशजकपिलमुनेराश्रमे योगाभ्यासाय शाकवृक्षे कृतवासाः शाक्या इति ख्यातिमापन्नाः।

**शाक्यमुनि** पु० शाक्यो मुनिः। बुद्धभेदे अमरः।

**शाक्यसिंह** पु० शाक्यवंशे सिंह इव। बुद्धभेदे अमरः।

**शाक्र** त्रि० शक्रस्येदं स देवताऽस्य वा अण्। १इन्द्रसम्बन्धिनि २इन्द्रदेवताके हविरादौ। स्त्रियां ङीप्। शक्रस्तत्तुल्य-पराक्रमः अस्त्यस्या अण्। ३शक्रतुल्यपराक्रमायां दुर्गायाञ्च "इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा" देवीपु०।

**शाक्वर** पु० शक-ष्वरप् स्वार्थे अण्। वृषे हेमच०।

**शाख** व्याप्तौ भ्वा० पर० सक० सेट् इदित् चङि न ह्रस्वः। शाखति अशाखीत्।

**शाख** पु० शाख-अच्। कृत्तिकापुत्त्रे स्कन्दानुजे १कुमारानु-चरगणभेदे "अग्निपुत्त्रः कुमारस्तु शरस्तम्बे व्यजायत। तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः" मत्स्यपु०५अ०। २ग्रन्थपरिच्छेदे सर्गस्थानीये ग्रन्थांशभेदे शब्दच०। वृक्ष-स्यांशभेदे (डाल) स्त्री अमरः। ३पक्षान्तरे ४राहौ ५वेदै-कदेशे च स्त्री मेदि०। ६अन्तिके विश्वः। ७देहांशभेदे च।

**शाखाकण्ट** पु० शाखाव्यापी कण्टः कण्टको यस्य। स्नुही-

वृक्षे राजनि०। [पुरे अमरः। शाखापुरादयोऽप्यत्र

**शाखानगर** न० शाखेव नगरम्। मूलनगरसमीपस्थे क्षुद्र-

**शाखापित्त** पु० शाखासु पित्तं यतः। पाणिपादादिदेह-शाखादाहे राजनि०। [स्त्रियां ङीष्।

**शाखामृग** पुंस्त्री० शाखास्थो मृगः पशुः। वानरे अमरः।

**शाखाम्ला** स्त्री शाखास्वप्यम्ला। वृक्षाम्ले राजनि०।

**शाखारण्ड** पु० शाखायां वेदशाखायां रण्डः तद्विहित कर्मानाचरणात्। स्वशाखात्यागेनापरशाखोक्तकर्मकर्त्तरि हेमच०। [राजनि०।

**शाखाल** पु० शाखाः बाहुल्येन सन्त्यस्य अच्। वानीरवृक्षे

**शाखाशिफा** स्त्री शाखारूढा शिफा मूलम् शाक०। वटा-दीनां शाखाजाते १मूले अमरः। २शिफामारभ्य शाखा युतायां गुडूच्यादिलतायाम् भरतः।

**शाखिन्** पु० शाखाऽस्त्यस्य इनि। १वृक्षे अमरः। २वेदैक-देशवति, ३नृपभेदे, ४म्लेच्छभेदे च मेदि०।

**शाखोट** पु० शाख-व्याप्तौ ओटन् (शेओड़ा) वृक्षे त्रिका०। स्वार्थे क। तत्रैव।

**शाङ्खिक** पुंस्त्री० शङ्खस्तद्विकारवलयनिर्माणं शिल्पमस्य ठञ्। जातिभेदे (शाँखारी) अमरः स्त्रियां ङीष्। [रत्नमा०।

**शाङ्कुष्ठा** स्त्री शशति शो-क शः अङ्कुष्ठ इव यस्याः। गुञ्जायां

**शाट** पु० शट-घञ्। वस्त्रे अमरः। स्त्रीत्वमपि गौरा०ङीष्।

**शाटक** पु०न० शट-ण्वुल्। वस्त्रे अमरः स्त्रीत्वमपि टाप्।

**शाट्यायन** पु० १मुनिभेदे, तेन प्रोक्तम् अण्। २प्रकृतहोम-कर्मणि वैगुण्यसमाधनार्थं विहिते होमभेदे न०भवदेवः।

**शाठ्य** न० शठस्य भावः ष्यञ्। शठतायाम्। [चङि न ह्रस्वः।

**शाड** श्लाघायां भ्वा०आ०सक० सेट्। शाडते अशाडिष्ट ऋदित्

**शाण** न० शणेन निर्वृत्तम् अण्। शणसूत्रनिर्मिते १वस्त्रादौ शण-दाने(तेजने) घञ्। (कष्टिपाथर) २कषपाषाणे ३अस्त्रादीनां निकषणे तीक्ष्णकरणयन्त्रभेदे मेदि० ४करू-पत्रे (करात) विश्वः। ५माषचतुष्कमाने मानम्०।

**शाणाजीव** पु० शाणमाजीवति आ+जीव-अण्। अस्त्र-तीक्ष्णताकारके शिल्पिनि हेमच०।

**शाणि** पु० शण-इण्। १पट्टवृक्षे शब्दच०। शणेन निर्वृत्ता इञ् वा ङीप्। २शणनिर्मिते पट्टिकावस्त्रे ३अच्छिद्रवस्त्रे च हेमच० ४हस्तकटाक्षादिसूचनायां शब्दर०। ५वस्त्र-मण्डपे (ताँबु) मेदि०।

**शाणित** त्रि० शण-दाने (तेजने) णिच्-क्त। तीक्ष्णीकृते।

**शाणीर** न० शण-बा० ईरण्। शोणनदमध्यस्थतटे विश्वः।